শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে কিষ্কিন্ধাকাণ্ডে

# ॥ ত্রিষষ্টিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ত্রিষষ্টিতমঃ সর্গঃ ॥

## সম্পাতের্নৱপুঙ্খোদ্গমস্তস্য ৱানরাণাং প্রোৎসাহনং কৃৎৱা তত উড্ডযনং ৱানরাণাং ততো দক্ষিণস্যাং প্রস্থানং চ

এতৈরন্যৈশ্চ বহুভির্ৱাক্যৈর্ৱাক্যৱিশারদঃ।
মাং প্রশস্যাভ্যনুজ্ঞাপ্য প্রৱিষ্টঃ স স্ৱমালযম্॥ **4.63.1** ॥

কন্দরাৎ তু ৱিসর্পিৎৱা পর্ৱতস্য শনৈঃ শনৈঃ।
অহং ৱিন্ধ্যং সমারুহ্য ভৱতঃ প্রতিপালযে॥ **4.63.2** ॥

অদ্য ৎৱেতস্য কালস্য ৱর্ষং সাগ্রশতং গতম্।
দেশকালপ্রতীক্ষোঽস্মি হৃদি কৃৎৱা মুনের্ৱচঃ॥ **4.63.3** ॥

মহাপ্রস্থানমাসাদ্য স্ৱর্গতে তু নিশাকরে।
মাং নির্দহতি সন্তাপো ৱিতর্কৈর্বহুভির্ৱৃতম্॥ **4.63.4** ॥

উদিতাং মরণে বুদ্ধিং মুনিৱাক্যৈর্নিৱর্তযে।
বুদ্ধির্যা তেন মে দত্তা প্রাণানাং রক্ষণে মম॥ **4.63.5** ॥

সা মেঽপনযতে দুঃখং দীপ্তেৱাগ্নিশিখা তমঃ।
বুধ্যতা চ মযা ৱীর্যং রাৱণস্য দুরাত্মনঃ॥ **4.63.6** ॥

পুত্রঃ সন্তর্জিতো ৱাগ্ভির্ন ত্রাতা মৈথিলী কথম্।
তস্যা ৱিলপিতং শ্রুৎৱা তৌ চ সীতাৱিযোজিতৌ॥ **4.63.7** ॥

ন মে দশরথস্নেহাৎ পুত্রেণোৎপাদিতং প্রিযম্।
তস্য ৎৱেৱং ক্রূৱাণস্য সংহতৈর্ৱানরৈঃ সহ॥ **4.63.8**॥

উৎপেততুস্তদা পক্ষৌ সমক্ষং ৱনচারিণাম্।
স দৃষ্টৱা স্বাং তনুং পক্ষৈরুদ্গতৈররুণচ্ছদৈঃ॥ **4.63.9**॥

প্রহর্ষমতুলং লেভে ৱানরাংশ্চেদমব্রৱীৎ।
নিশাকরস্য রাজর্ষেঃ প্রসাদাদমিতৌজসঃ॥ **4.63.10**॥

আদিত্যরশ্মিনির্দগ্ধৌ পক্ষৌ পুনরুপস্থিতৌ।
যৌৱনে ৱর্তমানস্য মমাসীদ্ যঃ পরাক্রমঃ॥ **4.63.11**॥

তমেৱাদ্যাৱগচ্ছামি বলং পৌরুষমেৱ চ।
সর্ৱথা ক্রিযতাং যত্নঃ সীতামধিগমিষ্যথ॥ **4.63.12**॥

পক্ষলাভো মমাযং ৱঃ সিদ্ধিপ্রত্যযকারকঃ।
ইত্যুক্ত্বা তান্ হরীন্ সর্ৱান্ সম্পাতিঃ পতগোত্তমঃ॥ **4.63.13**॥

উৎপপাত গিরেঃ শৃঙ্গাজ্জিজ্ঞাসুঃ খগমো গতিম্।
তস্য তদ্ ৱচনং শ্রুৎৱা প্রতিসংহৃষ্টমানসাঃ।
বভূৱুর্হরিশার্দূলা ৱিক্রমাভ্যুদযোন্মুখাঃ॥ **4.63.14**॥

অথ পৱনসমানৱিক্রমাঃ
 প্লৱগৱরাঃ প্রতিলব্ধপৌরুষাঃ।
অভিজিদভিমুখাং দিশং যযু -
 র্জনকসুতাপরিমার্গণোন্মুখাঃ॥ **4.63.15**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
কিষ্কিন্ধাকাণ্ডে ত্রিষষ্টিতমঃ সর্গঃ ॥